# योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३२


अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

अथ वीरवरोत्कण्ठनृत्यदप्सरसि स्थिता ।

लीलावलोकयामास व्योम्नि विद्यान्वितावनौ ।। १

स्वराष्ट्रमण्डले भर्तृपालिते बलमालिते ।

कस्मिंश्चिद्विततारण्ये द्वितीयाकाशभीषणे ।। २

सेनाद्वितयमाक्षुब्धं सौम्याब्धिद्वितयोपमम् ।

महारम्भघनं मत्तं स्थितं राजद्वयान्वितम् ।। ३

युद्धसज्जं सुसंनद्धमिद्धमग्निमिवाद्भुतम् ।

पूर्वप्रहारसंपातप्रेक्षाक्षुब्धाक्षिलक्षितम् ।। ४

उद्यतामलनिस्त्रिंशधारासारवहज्जनम् ।

कचत्परश्वधप्रासभिन्दिपालर्ष्टिमुद्गरम् ।। ५

गरुत्मत्पक्षविक्षुब्धवनसंपातकम्पितम् ।

उद्यद्दिनकरालोकचञ्चत्कनककङ्कटम् ।। ६

परस्परमुखालोककोपप्रोद्दामितायुधम् ।

अन्योन्यबद्धदृष्टित्वाच्चित्रं भित्ताविवार्पितम् ।। ७

लेखामर्यादया दीर्घबद्धया स्थापितस्थिति ।

अनिवार्यमहासैन्यझांकाराश्रुतसंकथम् ।। ८

पूर्वप्रहारस्मयतश्चिरं संशान्तदुन्दुभि ।

निबद्धयोधसंस्थाननिखिलानीकमन्थरम् ।। ९

धनुर्द्वितथमात्रात्मशून्यमध्यैकसेतुना ।

विभक्तं कल्पवातेन मत्तमेकार्णवं यथा ।। १०

काये संकटसंरम्भचिन्तापरवशेश्वरम् ।

विरटद्भेककण्ठत्वग्भङ्गुरातुरहृद्गुहम् ।। ११

प्राणसर्वस्वसंत्यागसोद्योगासंख्यसैनिकम् ।

कर्णाकृष्टशरौघौघत्यागोन्मुखधनुर्धरम् ।। १२

प्रहारपातसंप्रेक्षानिष्पन्दासंख्यसैनिकम् ।

अन्योन्योत्कण्ठकाठिन्यभरभ्रुकुटिसंकटम् ।। १३

परस्परसुसंघट्टकटुटङ्कारकङ्कटम् ।

वीरयोधमुखादग्धभीरुप्रेप्सितकोटरम् ।। १४

मिथःसंस्थानकालोकमात्रासंदिग्धजीवितम् ।

समस्ताङ्गरुहासक्तप्रांशुवृद्धेभमानवम् ।। १५

पूर्वप्रहारसंप्रेक्षाव्यग्रप्राणतया तया ।

संशान्तकल्लोलरवं निद्रामुद्रपुरोपमम् ।। १५

संशान्तशङ्खसंघाततूर्यनिर्ह्रादददुन्दुभि ।

भूतलाकाशसंलीनसर्वपांसुपयोधरम् ।। १७

पलायनपरैः पश्चात्त्यक्तमङ्गुलमण्डलम् ।

विसारिमकरव्यूहमत्स्यसंख्याब्धिभासुरम् ।। १८

पताकामञ्जरीपुञ्जविजिताकाशतारकम् ।

हास्तिकोत्तम्भितकरकाननीकृतखान्तरम् ।। १९

तरत्तरलभापूरसपक्षसकलायुधम् ।

धमद्धमितिशब्दैश्च श्वासोस्थैर्ध्मातखान्तरम् ।। २०

चक्रव्यूहकराक्रान्तदुर्वृत्तसुरभासुरम् ।

गरुडव्यूहसंरम्भविद्रवन्नागसंचयम् ।। २१

श्येनव्यूहविभिन्नाग्रसंनिवेशोत्तमध्वनि ।

अन्योन्यास्फोटनिःशेषप्रपतद्भूरिवृन्दकम् ।। २२

विविधव्यूहविन्यासवान्तवीरवरारवम् ।

करप्रतोलनोल्लासमत्तमुद्गरमण्डलम् ।। २३

कृष्णायुधांशुजलदश्यामीकृतदिवाकरम् ।

अनिलाधूतपल्यूलसूत्कृताभशरध्वनि ।। २४

अनेककल्पकल्पाग्रसवृन्दमिव संस्थितम् ।

प्रलयानिलसंक्षुब्धमेकार्णवमिवोत्थितम् ।। २५

सद्यश्छिन्नं महामेरोः पक्षद्वयमिव स्फुरत् ।

क्षुब्धमारुतनिर्धूतमिव कज्जलपर्वतम् ।। २६

पातालकुहरात्क्षुब्धमन्धकारमिवोत्थितम् ।

लोकालोकमिवोन्मत्तनृत्यलोललसत्तटम् ।

महानरकसंघातं भित्त्वावनिमिवोत्थितम् ।। २७

आलोलकुन्तमुसलासिपरश्वधांशु-

श्यामायमानदिवसातपवारिपूरैः ।

एकार्णवं भुवनकोशमिवाचिरेण

कर्तुं समुद्यतमगाधमनन्तपूरैः ।। २८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलोपाख्याने आहवारम्भणं नाम द्वात्रिंशः सर्गः ।। ३२ ।।